Vaidika Pandit Sri V. Hariharan Collection, Shri Kanchi Kamakoti Peetham Educational Trust, Sankara Mutt, Perumbakkam, Chennai-600 100

தனி பிரதி விலை ரூ. 4
(September 2013)

संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः ஸம்ஸ்க்ருதஸ்ரீ:

Samskritasri

स वो विघ्नेश्वरः पायात् नमितोन्नमितेन यम्।
अनुनृत्यति नृत्यन्तं सन्ध्यासु भुवनावली ॥

—कश्चित्

Monthly Journal of
Education Society

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(24951402

THE SAMSKRIT EDUCATION SOCIETY (Regd) CHENNAI

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

President : Vaidya Sri S.V. Radhakrishna Sastri

Secretary & Treasurer : Sri G. SITHARAMAN, F.C.A.

Editor and Publisher : S. SRINIVASA SARMA
Samskritasri
34, Senthamil Nagar,
Near : Indra Nagar & New Railway Station
Big Kancheepuram - 631 502
Cell : 90941 53190

பாடங்கள் நடத்துபவர்கள் :

1.	ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன்,	ஆழ்வார்ப்பேட்டை	24353597
2.	ஸ்ரீமதி மாலதீ பாலசுப்ரமண்யம்,	மேடவாக்கம்	9884158110
3.	ஸ்ரீமதி சாந்தி அசோக்	மந்தைவெளி	24951402
4.	ஸ்ரீமதி கௌரீ கருணாகரன்,	மைலாப்பூர்	24320544
5.	ஸ்ரீமதி ரமாசுந்தரராஜன்,	சென்னை-95	65687635
6.	ஸ்ரீமதீ பார்வதீ ராமசந்திரன்	அண்ணா நகர்	26215719
7.	ஸ்ரீ R. முத்து கிருஷ்ணன்	கொரட்டூர்	26248430
8.	ஸ்ரீ S. ரங்கநாத சர்மா,	சேலையூர்	22291720
9.	ஸ்ரீமதி புவனேச்வரீ	ராஜகீழ்பாக்கம்	9841212047
10.	ஸ்ரீ K. ராஜேச்வரீ	மாடம்பாக்கம்	9962837319
11.	ஸ்ரீ S. ஹரிஹரன்	நங்கைநல்லூர்	9841403859
12.	ஸ்ரீ S. அனந்தன்	சானிடோரியம்	9894709418
13.	ஸ்ரீ P.R. சுப்ரமண்யம்	K.K. நகர்	23640864
14.	ஸ்ரீ N. ஜானகீ ராமசாஸ்த்ரீ	I.T.I. கிண்டி	24953144
15.	ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய	ஸ்ரீரங்கம்	2430632
16.	ஸ்ரீமதீ ராஜம் சுந்தர்	திருநெல்வேலி	9488326850
17.	ஸ்ரீ T.V. ஸ்ரீநிவாஸ தாதாசார்ய	காஞ்சீபுரம்	27269153
18.	ஸ்ரீ P.D. ஸ்ரீநிவாஸன்,	திருநின்றவூர்	9445703470
19.	ஸ்ரீ S. திருமலை,	காஞ்சீபுரம்	97895 84125
20.	ஸ்ரீ R. ரங்கநாதன்	காஞ்சீபுரம்	97910 55428
21.	ஸ்ரீ C.A. ஏகாம்பரம்	கோயம்புத்தூர்	0422-2233242
22.	ஸ்ரீமதி டி.வி. ஜயலக்ஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002,		0487-2382964
23.	ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், மும்பை (E)		09757115154

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

माला: : 35 SEPTEMBER-2013 पुष्पम् 11

कलि : 5109 विजय - कन्यामासे 33—11

The Samskrit Education Society Established with the blessings of His Holiness SRI MAHASWAMIGAL of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:

No.283, T.T.K.Salai Alwarpet, Chennai-18 and Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.

PRESENT ACTIVITIES

1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI
Founder Editor
Vaidyasri
SRI S.V. RADHAKRISHNA SASTR ,
Hon. Editor.
Dr. N. VEEZHINATHAN
Editor and Publisher
Dr. S. SRINIVASA SARMA

Hon. Academic Advisors :

Dr. K. SRINIVASAN,
Vivekananda College, Chennai
Dr. Devi Prasad
Madras Sanskrit College,
Dr. P.S. Ramamoorthi
Egmore Sanskrit School

Associate Editors :

Pandit S. Ranganatha Sarma, Chennai
Prof. G. Srinivasu, Kanchipuram
Prof. C.V. Seshadri, Chidambaram

१. श्री वेदव्याससुप्रभातस्तोत्रम् ।। .. २
२.वेद स्तुतिः । ५
३. दीपज्योतिः ! ६
४. श्री वेङ्कटेशपञ्चरत्नस्तोत्रम् ।। ७
५. अयोध्याशतकम् । ८
6. பவாநீ பாரதீ. 12
७. तिरुक्कुरल् १६
८. किरातार्जुनीये प्रथमः सर्गः १८
९.गुरुभक्त उपमन्युः। २१
१०. विनिपातः । २५
११. अन्तर्जलस्य संरक्षणम् । २७
१२. लोकस्य आधुनिकी स्थितिः । ३३
१३. शृण्वन्तु कथामेकाम् । ३६

SUBSCRIPTION RATES

ANNUAL :	Rs. 40/-
LIFE SUBSCRIPTION	Rs. 400/-
Page Donation	Rs. 200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer,

The Samskrit Education Society (Regd.).
Old 212/13-1, St.Mary's Road, Mandaiveli,
Chennai - 600 028. Ph: **044-2495 14 02**

CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy,

॥ श्रीरस्तु ॥
Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्री वेदव्याससुप्रभातस्तोत्रम् ॥

—पण्डितः शे. रङ्गनाथशर्मा, सेलैयूर्, चेन्नै।

श्री गणेशमहं वन्दे व्यासभारतलेखकम्।
देवीं सरस्वतीं व्यासं तथाऽऽचार्यपरम्पराम् ॥ १

देवेन्द्रमुख्यैर्दिविषद्भरेण्यैः संप्रार्थितः श्रीपतिरादरात् पुरा।
भुवं प्रवेष्टुं हि सनातनस्य धर्मस्य रक्षार्थमधर्मकूपात् ॥ २

अवाप्तकामः स तथैव कर्तुं मतिं चकाराऽथ भुवः प्रवेशे।
येनेप्सितं पुण्यसुतत्वमाप्तुं पराशरं सत्यवतीञ्च दृष्ट्वा ॥ ३

स्वमायया सङ्गमयंस्तदा तौ साक्षादभूच्चापि तयोस्तदानीम्।
आमन्त्र्य तौ ब्रह्म चरन् महात्मा सरस्वतीतीरतपश्चचार ॥ ४

संप्राप्तसिद्धिः सकलागमेषु रेजे मुनिः सूर्यशशाङ्करोचिः।
व्यभाजयदादौ महनीयकीर्तिः वेदांश्चतुर्धा शिथिलांश्च सर्वान् ॥ ५

सुमन्तुमुख्या मुनयोऽधिजग्मुः वेदान् विभक्तान् गुरुराजवर्ष्याः।
लोकोपदेशाय कृतावतारं व्यासं स्तुमः सुप्रतिभातपद्यैः ॥ ६

नमोऽस्तु ते व्यास तपोधनाढ्य ! कलिन्दजामध्यतटप्रसूत।
श्रीकृष्णविष्णोरवतारभूत ! तुभ्यं वदाम शुभदं प्रभातम् ॥ ७

लक्षग्रन्थसमाबद्धमहाभारतपाठक !
धर्मोपदेशसिद्धार्थ ! सुप्रभातं वदामि ते ॥ ८

दशाष्टसङ्ख्याकपुराणबृन्दं संग्रथ्य दत्तो मधुरोपहारः।
यत्र त्वया धर्मकथाः प्रकृष्टाः श्रीव्यासबन्धो! तव सुप्रभातम् ॥ ९

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीकृष्णलीलाकथनाय पुण्यं सुसञ्चितं भागवतं पुराणम्।
त्वदीयपुत्रः शुक एव लोके प्रासारयत् तस्य च सुप्रभातम्॥ १०

ब्रह्मज्ञानप्रदानाय ब्रह्मसूत्रविधायक!
समाधियोगनिष्ठानां गुरो! ते सुप्रभातकम्॥ ११

वेदान्तसिद्धान्त - विचार - धारा प्रवाहिता येन गुरूत्तमेन।
अद्वैतविद्यागुरुमेव मत्वा यः पूजितस्तस्य च सुप्रभातम्॥ १२

व्यासस्य सूत्रार्थविवेचनाय
श्रीशङ्करार्यः प्रणिनाय भाष्यम्।
व्याख्याः कृतास्तस्य तदीयशिष्यैः
तेषां समेषामपि सुप्रभातम्॥

गुरु-शुक्र-कणादादिपूजिताय महर्षये।
आचार्यपीठमास्थाय धात्रे भवतु मङ्गलम्॥ १४

जटावल्कलशोभाढ्यो! वेदरक्षणकारकः।
शौनकादिभिराराध्यो यस्ते भवतु मङ्गलम्॥ १५

शुकतात! महाबुद्धे! महात्मन्! नारदप्रिय!।
मैत्रेयमित्र! मान्यस्त्वं मङ्गलानि भवन्तु ते॥ १६

शम्याप्रान्तनिवासी त्वं रोमहर्षणरक्षकः।
सूतमण्डलसेव्यश्च तत् ते भवतु मङ्गलम्॥ १७

कमण्डलुधरो योगी कामक्रोधविनाशकः।
जितेन्द्रियो जितात्मा त्वं तत् ते भवतु मङ्गलम्॥ १७

पञ्चपाण्डवपालाय पाञ्चालीभद्रकारिणे।
कृष्णलीलारसज्ञाय वेदव्यासाय मङ्गलम्॥ १९

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy

Digitized by Vaidika Pandit Sri V Haribabu Collection, Sholinganallur, Chennai

काशीविश्वेशपूज्याय कल्याणीप्रियदायिने ।
नारायणस्वरूपाय वेदव्यासाय मङ्गलम् ।। २०

नैमिशारण्यवासाय नित्यकर्मविधायिने ।
नामस्मरणतृप्ताय नादरूपाय मङ्गलम् ।। २१

गुरु-पूर्णा-सुजाताय गुरुशिष्यत्वकारिणे ।
कवि-रङ्गस्य नाथाय काव्यगीताय मङ्गलम् ।। २२

सर्वसङ्कटमोक्षाय दिव्यानन्दोपलब्धये ।
सुप्रभातं पठेन्नित्यं वेदव्यासस्य शोभनम् ।। २३

वर्धतां संस्कृतं शश्वत् भारतीयत्वसिद्धये ।
लोकक्षेमप्रदानाय वर्धन्तां गुरुवस्तथा ।। २४

स्वस्त्यस्तु भूमण्डलसज्जनेभ्यः चराचरेभ्यः सुचरित्रकेभ्यः ।
वेदेतिहासेषु पुराणबृन्दे सक्तिश्च भूयात् सकलप्रजानाम् ।।

योगी भोगी, विषभुगमृतः शस्त्रपाणिस्तपस्वी
शान्तःक्रूरः शमितविषयः शैलकन्यासहायः ।
भिक्षावृत्तिर्भुवनपतिः शुद्धिमानस्थिमाली
शक्यो ज्ञातुं कथमिव शिव ! त्वं विरुद्धस्वभावः ।।

ஹே சிவ பெருமானே ! நீர் ஒரு பக்கம் யோக நிஷ்டராகவும், மறு பக்கம் விஷய போகங்களில் பற்றுடையவராகவும் காணப்படுகிறீர். விஷத்தை உண்டதும் உண்டு, நீண்டு நிலையாய் இருப்பதும் உண்டு, கையில் ஆயுதம் ஏந்தியவர்தான், ஆனால் தவம் மேற்கொண்டவர் ! சாந்த ஸ்வபாவமுள்ளவர் ஆனாலும் கொடியவரும் கூட ! விஷயப் பற்றில்லாதவர், ஆயினும் எப்பொழுதும் பார்வதி வாமபாகர் ! பிக்ஷாடனராயினும் மூவுலகத்திற்கும் காப்பாளர், தூய்மையே உருவானவர் ஆயினும் அஸ்திமாலையணிந்தவர்

—ஸ்ரீ தண்டிமஹாகவி - அனைய ஸ்தோத்ரம்

CC-0. Prof. Satya Vrat Shastri Collection. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

वेद स्तुतिः ।

—कूडलूर G.R. रामचन्द्रशास्त्री, अद्वैत सभाध्यक्षः कुंभकोणम्।

निःश्वासरूपाः परमेश्वरस्य प्रमाणमूर्द्धन्यतमाश्च धर्मे।
निरन्तरं रक्षत नः कुलानि वेदा ! वयं वः शरणं प्रपन्नाः ।। १

ऋग्वेदरूपेण विनिर्गता ये प्रत्यङ्मुखाद्वै परमेश्वरस्य।
यज्ञेषु हौत्रे विनियोक्ष्यमाणाः वेदाः ! वयं वः शरणं प्रपन्नाः ।। २

आध्वर्यवे कर्मणि शोभमानाः ह्यागत्य सौम्याद्वदनात् शिवस्य।
सर्वस्य लोकस्य शिवंकरा ये वेदा! वयं वः शरणं प्रपन्नाः ।। ३

औद्गातृके कर्मणि गीयमानाः शम्भोस्सदा मोदकराश्च यूयम्।
शिवस्य पूर्वाद्वदनात्प्रवृत्ताः वेदा ! वयं वः शरणं प्रपन्नाः ।। ४

आथर्ववेदाः परमेश्वरस्य ह्यघोरवक्त्रात्तु समागता ये।
ब्राह्मे तथा पुष्टिकरे सुयुक्ताः वेदा ! वयं वः शरणं प्रपन्नाः ।। ५

वेदोक्त - कर्माणि शुभानि कृत्वा सर्वाणि वेदोक्त-फलानि लब्ध्वा।
वेदान्तविज्ञानसुनिश्चितार्थाः सर्वे भवामो भवतां प्रसादात् ।। ६

उद्दण्डताण्डवमुदञ्चितलास्यलीलं
कर्तुं स्वयं युगपदेव समुत्सुकात्मा।
यः कामिनीकलितकम्रतरार्धकायः
सोऽयं पुनातु विभुरादितरः सुराणाम्।

மேலான லாஸ்ய லீலையும் சேர்ந்ததான - கம்பீரமான தாண்டவத்தையும் ஒரே ஸமயத்தில் தானே செய்து ரஸிக்க எண்ணம் கொண்டார் மகேச்வரன். (அதன் விளைவாக) அர்தநாரீச்வர கோலதத்தில் - மிக அழகிய பெண் வடிவமுடன் அமைந்த பகுதி உடலுடன் - தோன்றினரே அந்த ஆதி தேவன்! அவரே நம்மையும் புனிதராக்கட்டும்

—ஸங்கீத வித்யா விநோதம்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hanumantha Collection, Sholinganallur, Chennai

दीपज्योतिः!

(कानडारागेण आदितालेन च गीयते)

—R. *वाणीश्रीः, भारतीयविद्याभवनम्, तिरुपति।*

ज्योतिषे परम् ज्योतिषे दीपज्योतिषे नमः।
ज्योतिषे शुभ-ज्योतिषे शुद्ध ज्योतिषे नमः।

स्वर्णभासिनी सत्वबोधिनी - सकल-ज्ञान संवर्धिनी।
सुखप्रदायिनी - शीतरूपिणी - सर्व - दिक्षु दीपशिखा! ।।

सत्यकामिनी - शक्ति शालिनी - सदा-शुभप्रदर्शिनी।
शोभादायिनी श्रेयःकारिणी सर्व-काम-संपूरणी।।

परमपावनी - पुण्यकारिणी परब्रह्मस्वरूपिणी।
पीतज्वालिनी पूयूषदायिनी पवने डोलायनी।।

दुःखनिवारिणी - दुरितदूरिणी - दुर्गुण संहारिणी।
दीपशिखा - दोष-हारिणी दुःखान्धकार प्रणाशिनी।

विदग्धव्याहारैर्न जडमतिरानन्दति मनाक्
अनालापज्ञानां न च वचनतः खेदमयते।
न विन्दत्यानन्दं जरठमहिषश्चन्दनरसैः
असौ पङ्कालेपैरपि खलु विषादं न जुषते।।

மழுங்கிய புத்தியுள்ளவன், அறிவாளிகளின் அறிவுரை கேட்டு சற்றேனும் மகிழ்வதில்லை, பேசத் தெரியாதவர் பேச்சு கேட்டும் அவன் வெறுப்படைவதில்லை. பாருங்களேன்! கிழட்டு எருமை, சந்தன ரஸத்தாலும் மகிழ்ச்சி கொள்வதில்லை. சேறு-சகதி பூசப்பட்டும் துன்பப்படுவதுமில்லையே!

—அடயப்பலம் ஸ்ரீ வேங்கடாத்வரீ

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy.

Vaidika Pandit Sri V. Hariharan Collection, Sholinganallur, Chennai

श्री वेङ्कटेशपञ्चरत्नस्तोत्रम् ।।

—कूडलूर् G.R. रामचन्द्रशास्त्री, अद्वैतसभाध्यक्षः, कुम्भकोणम्

वेङ्कटेशनामकं वेङ्कटाद्रिनायकं
कार्तिकेयमातुलं सुपार्वतीसहोदरम्।
सारतीरवासिनं तु सार्वभौममीश्वरं
वेङ्कटेशमाश्रये सुमङ्गलप्रसिद्धये ।।

लक्ष्मिनायकं प्रभुं स्वसर्वसिद्धिदायकं
नित्यवैभवं प्रभुं नमस्कृताभमीष्टदम्।
वेदरक्षकं प्रभुं वराहरूप धारिणं
वेङ्कटेशमाश्रये सुमङ्गलप्रसिद्धये ।।

जानकीसुनायकं विशुद्धधर्मविग्रहं
गीतनीतिदायकं जगद्गुरुं जनार्दनम्।
जातरूपवाससं ज्वलत्किरीटधारिणं
वेङ्कटेशमाश्रये सुमङ्गलप्रसिद्धये ।।

शङ्खचक्रधारिणं वरप्रदं भयापहं
शङ्करस्वरूपिणं कुमाररूपधारिणम्।
शोभमानपादुकं समस्तलोकरक्षकं
वेङ्कटेशमाश्रये सुमङ्गळप्रसिद्धये ।।

श्रीनिवासनामकं कृपाकटाक्षवीक्षणं
कामितार्थदायकं सदाऽनुकूलचिन्तकम्।
वेदभक्तपोषकं विदूनदीनवत्सलं
वेङ्कटेशमाश्रये सुमङ्गलप्रसिद्धये ।।

रामचन्द्रसूरिदृष्टमद्भुतं मनोहरं तत्सुभक्तसूनुना समर्पितं हरेः पदे।
वेङ्कटेश पञ्चरत्नमादरेण यः पठेत् प्राप्य सर्वमायुरादि मोदते स सन्ततम् ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V.Hariharan Collection, Sholinganallur, Chennai

अयोध्याशतकम् । (अनुवर्तते)

मिश्रोऽभिराजराजेन्द्रः, पूर्वकुलपतिः, शिमला।

मुस्लिमानां समग्रापि संहतिर्मौनमास्थिता।
इज्रायलसमक्षन्तु मूषिकीभूय जीवति ॥ ११६

कैकता तव धर्मस्य क्व वा खड्गबलं गतम्?
क्व जिहादः क्व वा कुफ्रः साहसं क्व च गाजिनाम्॥ ११७

मुस्लिमानां कृते हन्त फिलिस्तीननिवासिनाम्।
इज्रायलाख्यदेशोऽसौ गाजीभूतस्स्वयं जयः ॥ ११८

भवल्लुण्ठनकालोऽसौ भवद्दास्यवसंकथाः ।
बृहदैतिह्यपर्णेषु निरुद्धाः सन्ति साम्प्रतम्॥ ११९

कालोऽसौ पुनरागन्ता नैव यत्नशतैरपि।
परिवर्त्य ततो ग्राह्या नवा जीवनपद्धतिः ॥ २२०

समस्यां भवतां बन्धो ! जानन्त्येव विपश्चितः ।
सन्ति येऽधीतिनस्सिद्धा इस्लामोद्भवमार्मिकाः ॥ २२१

स्त्रिस्तहिन्दुमते नूनमीश्वरः सर्वशक्तिमान्।
लीलयैवात्मतोषाय जगन्निर्माति हन्ति च ॥ २२२

कर्ता भोक्ता च साक्षी च सृष्टेरेकस्स ईश्वरः ।
सर्वतन्त्रस्वतन्त्रोऽसौ सर्वगः सर्वसंश्रयः ॥ २२३

किञ्चित्कर्तुमकर्तुं वाऽप्यन्यथाकर्तुमीश्वरः ।
ब्रह्माण्डरचनाशिल्पी शक्तोऽसौ भुवि विश्रुतः ॥ २२४

ईदृशाज्जगदाधारात्कस्य नो जायते भयम्।
अभीरुरपि सर्वेभ्यो धर्मभीरुर्ध्रुवं भवेत्॥ २२५

अल्लाताला परं बन्धो ! भवतां तादृशोऽस्ति नो।
स्वयं विचार्य पश्यन्तु सविवेकं ससंयमम् ॥ २२६

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

यथा चक्रे कुलालोऽसौ पात्रं निर्माति लीलया।
तथा मुहम्मदश्चक्रे खुदामात्मवशंवदम् ।। २२७

अल्लाहेस्लामधर्मस्य न स्वतन्त्रो न शक्तिमान्।
स्वदूताऽकाङ्क्षया सृष्टः सर्वथा तद्वशंवदः ।। २२८

प्रमाणयत्यसौ सर्वं दोषं पापं तदीयकम्।
यथा क्रीडनकं किञ्चित् प्रयोक्तू रञ्जयेन्मनः ।। १२९

अदीक्षिताः किलेस्लामे बध्याः काफिरसंज्ञकाः।
काफिरस्य वधो नूनं महत्पुण्ययशस्करः ।। १३०

मेषी -छागीसमा नारी ग्राह्या त्याज्या यथारुचि।
परजुष्टं भवेद्भोज्यं दिशेदेवं क ईश्वरः ।। १३१

यतो हि भवतामल्ला भवत्स्वार्थसमर्थकः।
भवदाज्ञाकरश्चापि भवत्किल्बिषमर्षकः ।। १३२

ततश्चेस्लामधर्मेऽस्मिन् न दृष्टा धर्मभीरुता।
नेश्वरात्परलोकाद्वा भयं कस्यापि जायते ।। १३३

प्रणम्यो भवतामल्ला यद्यसौ भणति स्वयम्।
धर्म इस्लाम एवैकोऽस्त्यधर्मा इतरे भुवि ।। १३४

ईश्वराच्च भये नष्टे धर्मोऽयं नष्टशृङ्खलः।
परिभाष्य मुधात्मानं सन्तापयति भूतलम् ।। १३५

दुश्चरितान्यपीस्लामे सत्कर्माणि भवन्ति हि।
यतो मुहम्मदाधीनं सर्वमेव न तद्बहिः ।। १३६

श्रोतुं मन्तुं तथाप्येतत् सत्यं यूयं क्षमा नहि।
स्वातन्त्र्यं नु विचाराणामिस्लामे क नु दृश्यते ।। १३७

साधितमीश्वरास्तित्वं हिन्दुदार्शनिकैर्यथा।
तथैव खण्डितश्चापि दृढतर्कैर्विना भयम् ।। १३८

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अभिनन्द्योभयी दृष्टिर्ज्ञानमीमांसया मता ।
समाचरन्तु विज्ञाय सर्वं लोका यथारुचि ।। १३९

कुराणादितरच्छ्रोतुं किन्तु यूयं नहि क्षमाः ।
स्वातन्त्र्यं धीविलासानां भवतां नैव सम्मतम् ।। १४०

अलमस्मिन्नु सन्दर्भे लोचनोन्मीलनक्रमैः ।
मधुकोषं विनिर्मातुं भ्रामरी वृत्तिरिष्यते ।। १४१

तत्त्वाधिगमार्थञ्च हृदयं समपेक्ष्यते ।
तच्चैव हृदयं बन्धो ! भवद्देहे न वर्तते ।। १४२

भवद्धर्मस्वरूपं तु काल एव हि केवलम् ।
व्याख्यास्यति यथाकालं स कालोऽस्माभिरीक्ष्यताम् ।। २४३

ज्ञानं न जायते दिव्यं नूनमिश्वरमुद्रया ।
ज्ञानस्य दिव्यता बन्धो ! शपथैर्न विभाव्यते ।। १४४

कीटमत्कुणकल्पं स्याद्योषितां यत्र जीवनम् ।
तादृशीं देशनां विज्ञ ऐश्वरीं को नु मन्यते ।। १४५

शब्दोच्चारणमात्रेण यत्र दाम्पत्यबन्धनम् ।
त्रुट्येद्धि क्षणमात्रेण नूतनं वा पुरातनम् ।। १४६

नप्त्रीकल्पामहो बालामरजस्कां गतस्मराम् ।
भोगार्थं यत्र गृह्णीयुः पशुकामा धनोन्मदाः ।। १४७

जीविष्यति कियत्कालं धर्मोऽसौ नयविच्युतः ।
पैगम्बरवचोरूढो रूढिभिश्च नियन्त्रितः ।। १४८

वापीकूपतडागादिनीरकल्पो न सम्मतः ।
धर्मोऽयं रूढिसंग्रस्तो गतिशून्यो गिरिस्थिरः ।। १४९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नदीप्रवाहकल्पोऽद्धा धर्मो भवति शाश्वतः ।
दृश्यते गतिरोधो नो यत्र पूतिर्न मन्दता ।। १५०

नूनं कालपरीवर्तैस्सहैव परिवर्तते ।
धर्मोऽपि जनताऽऽकाङ्क्षापूरणाय सदोद्यतः ।। १५१

चिरत्नः सन्नपि स्वैरं नित्यनूत्नः प्रतीयते ।
हिन्दुधर्मोऽद्य चेत्तत्र कारणं परिवर्तनम् ।। १५२

युगापेक्षितसंवादैः पोषितो भिन्नदृष्टिभिः ।
लक्ष्यमापादितस्सद्भिः कोविदैर्भिन्नवर्त्मभिः ।। १५३

विश्वासैर्नियमैर्मार्गैर्व्रताचारैस्समर्चनैः ।
सम्पन्नो विविधैर्नूनं हिन्दुधर्मो महीयते ।। १५४

पालने न पुरस्कारोऽपालने नैव मृत्युभीः ।
स्वप्रमाणैरयं ग्राह्यो हिन्दुधर्मस्सनातनः ।। १५५

ईश्वरोऽस्ति निराकारो मन्दिरे च सविग्रहः ।
श्रेयस्सेऽप्युभयो मार्गो यथारुचि समाचर ।। १५६

स्वातन्त्र्यमीदृशं व्यक्तेरात्मनश्चापि दुर्लभम् ।
क्वचिदन्यत्र संसारे हिन्दुधर्मादृते नहि ।। १५७

अतो विहाय मात्सर्यं द्वेषबुद्धिं चिरन्तनीम् ।
सर्वधर्मोऽत्सकल्पेऽस्मिन् हिन्दुधर्मे धियङ्कुरु ।। १५८

श्रद्धयेदं महावाक्यं भेदबुद्धिं विहाय भोः ।
स्वीकार्यं भूतले सर्वैर्यत्र विश्वं सुरक्षितम् ।। १६०

इति श्री मद्दुर्गाप्रसादाऽभिराजीसुनूना समवाप्तमहामहिमराष्ट्रपति-सम्मानेन त्रिवेणीकविनाऽभिराजराजेन्द्रेण विरचितम्

अयोध्याशतकं परिसमाप्तम् ।

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

பவானீ பாரதீ.

—உரை R. கன்னன், நவீ, மும்பை.

सिंहस्य सारावं उदीरयन्ती क्रूरस्य कुञ्जे भ्रमतो वधार्थम्।
ससर्ज वाक्यानि करालमूर्तिः यथा समुद्रस्तनितं शिलायाम् ।।

कुञ्जे = காட்டில், वधार्थं = (பிராணிகளை) கொல்லுவதற்காக, भ्रमतः = சுற்றிக் கொண்டிருக்கும், क्रूरस्य = கொடுமையான, सिंहस्य = சிங்கத்தின், आरावं = சப்தத்தை, उदीरयन्ती = உதிர்த்துக் கொண்டு, करालमूर्तिः = பயங்கர உருவத்தையுடைய, सा = அந்த தேவி, वाक्यानि = வாக்கியங்களை, ससर्ज = உண்டாக்கினாள். शिलायां = பாறையில், समुद्रस्तनितं यथा = சமுத்திர வேகத்தினால் உண்டாகும் சப்தத்தைப் போல.

(பொ-உரை) காட்டில் பிராணிகளைக் கொல்லுவதற்காகவே சுற்றிக் கொண்டிருக்கும் கொடுமையான சிங்கத்தின் கர்ஜனைபோல, அந்த பயங்கர உருவத்துடன் தேவியானவள், சமுத்திரநீர் வேகமாக பாறையின் மீது மோதும்போது உண்டாகும் சப்தம் போன்ற குரலில் வாக்கியங்களை உதிர்த்தாள்.

(வி-உரை) தெய்வங்கள் காமக் குரோதங்களுக்கு முழுவதும் அப்பாற்பட்டவர்கள். இருந்தபோதும், அவதாரங்கள் எடுக்கும்போது, அதர்மத்தின் உருவாக இருக்கும் அரக்கர்களை அழிக்க முற்படும்போது, கோபத்தை வரவழைத்துக் கொண்டு சிம்ம கர்ஜனை செய்வது வழக்கம். ராமாயணத்திலும், ராமர் ராவணனை கொல்ல முற்பட்டபோது, कोपं चकार - கோபத்தை வரவழைத்துக் கொண்டார் என்று வருகிறது.

அதுபோன்ற கோபத்துடன், காளிதேவி, சோம்பிக் கிடக்கும் பிரஜைகளை உதிர்க்கிறாள்.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Thalinganallur, Chennai

मातास्मि भोः पुत्रक भारतानां सनातनानां त्रिदशप्रियाणाम्।
शक्तो न यान् पुत्र विधिर्विपक्षः कालोऽपि नो नाशयितुं यमो वा ।।

(ப-உரை) भोः पुत्रक = ஏ புத்திரனே, सनातनानां = சனாதன தர்மத்தைப் பின்பற்றுபவர்களும், त्रिदशप्रियाणां = தேவர்களுக்குப் பிரயமானவர்களும் ஆன, भारतानां = பாரத தேசத்தவர்களுடைய, माता अस्मि = தாயார் (நான்). पुत्र = புத்திரனே, यान् = எந்த பாரதீயர்களை, नाशयितुं = அழிப்பதற்கு, विधिः = தலைவிதியோ, विपक्षः = எதிரியோ, कालः अपि = காலம் கூடவோ, न शक्तः = சக்தியற்றவர்கள்; यमो वा = யமனோ கூட, नो = (சக்தி) அற்றவன்தான்.

(பொ-உரை) காளி, என்னிடம் கர்ஜித்ததாவது: ஏ புத்திரனே! சனாதன தர்மத்தைக் கடைப்பிடிப்பவர்களும், தேவர்களுக்குப் பிரயமானவர்களுமான பாரத தேசத்தைச் சேர்ந்தவர்களுடைய தாயார் நான். புத்திரனே ! இந்த பாரதீயர்களை அழிப்பதற்கு, தலைவிதியோ, எதிரியோ, (உகப்பில்லாத) காலமோ, யமனோ கூட சக்தியில்லாதவர்கள்.

(வி-உரை) சனாதன தர்மத்தை நன்குக பின்பற்றுவதால், பாரதீயர்கள் தேவர்களுக்குப் பிரியமானவர்களாகிருர்கள். பல புராணங்களில், தேவர்கள் பாரதீயர்களைக் கண்டு பொருமைப்படுவதாகக் கூட சொல்லப்பட்டு இருக்கிறது. கர்ம பூமியாகிய பாரத தேசத்தில் தர்மத்தைக் கடைப்பிடித்து சுலபமாக நற்கதியடைந்து விடுகிருர்களே என்று பொருமை.

பாரத நாட்டை எந்த வெளி நாட்டவரும் நிரந்தரமாக அடிமைப்படுத்தியதில்லை. விழிப்புணர்வு மேலிடும்போது, பாரதீயர்கள் வெகுண்டெழுந்து எதிரிகளை விரட்டித்தான் அடித்துக் கொண்டிருக்கிருர்கள். அதேபோல், பாரத கலாசாரத்தையும் எந்த வேற்று நாட்டு கலாசாரமும் அழித்த தென்பது கிடையவே கிடையாது. சனாதன தர்மமும், இந்திய கலாசாரமும் என்றுமே அழியாதவைகள். பாரதமாதா இத்தான் தன் குழந்தைகளுக்கு

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Digitized by Siddhanta eGangotri Gyaan Collection. Shotganallur Dhanam

இப்போது நினைவூட்டுகிறுள். சக்தியே உருவான தேவி, மிகுந்த புத்திர வாஞ்சையுடன், இருமுறை புத்திரனே என்றழைத்து, எதிரிகளை விரட்டும் சக்தியை குழந்தைகளுக்கு அருளுகிறுள்.

ते ब्रह्मचर्येण विशुद्धवीर्या ज्ञानेन ते भीमतपोभिरार्याः ।
सहस्रसूर्या इव भासुरास्ते समृद्धिमत्यां शुशुभुर्धरित्र्याम् ।।

(ப-உரை) ते आर्याः = அந்த பெரியவர்கள், ब्रह्मचर्येण = பிரம்மசர்யத்தினலும், ज्ञानेन = ஞானத்தினலும், भीमतपोभिः = கடுமையான தவங்களினலும், विशुद्धवीर्याः = பரிசுத்தமான வீரியம் கொண்டவர்களாய், सहस्रसूर्या इव = ஆயிரம் சூர்யர்களைப் போல, भासुराः = பிர்காசிப்பவர்களாய், समृद्धिमत्यां = செல்வச் செழிப்பு நிறைந்த, धरित्र्यां = பூமியில், शुशुभुः = சோபித்தனர்.

(பொ-உரை) காளிமேலும் சொன்னது - அந்த பாரதீய பெரியவர்கள் பிரம்ம சரியத்தினலும், ஞானத்தினலும், கடுமையான தவங்களினலும் பரிசுத்தமான வீரியம் கொண்டவர்களாய், ஆயிரம் சூர்யர்களைப் போல் பிரகாசித்துக் கொண்டு, செல்வச் செழிப்பு நிறைந்த பூமியில் சோபித்தனர்.

(வி.உரை) ஆன்மீக உபதேசத்தின்போது, குருவானவர் சீடனுக்கு அவனுடைய உண்மை நிலையை तत्त्वमसि = அந்த பரப்பிரம்மமாக நீ இருக்கிருப் என்று எடுத்துரைத்து, அந்த உயரிய பரபிரம்ம நிலையிலிருந்து ஜீவன் நழுவிவிழுந்து ஸம்ஸாரமாகிற சேற்றில் உழல்வதைக் காட்டி, திரும்பவும் அந்த உச்சிநிலையை அடைய வேண்டிய அவச்யத்தை போதிக்கிறுர். அதுபோல, காளிதேவி, பண்டைக் காலத்து பாரதீயர்கள் ஆன்மீகத்தில் மிகுந்த முன்னேற்றம் கண்டவர்களாய் இருந்ததை நினைவூட்டுகிறுள். இந்த முன்னேற்றத்திற்கு அவர்கள் கடைப்பிடித்த மார்க்கங்கள் பிரம்மசரியம், கடும் தவம், ஞானம் ஆகியவை. இந்த வழிகளின் மூலம் பிரம்ம சக்தி நிரப்பம்ப் பெற்றவர்களாய் இருந்த அவர்களிடம் தேவர்கள் மிகுந்த அன்புடன் இயற்கை வளத்தை வாரி வழங்கினர்கள். பூமி செழிப்புடன் குதூகலமாய் விளங்கிற்று.

CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit S.V.Hariharan Collection, Shringeri, Chennai

शूराः प्रगल्भाश्च हि शात्रवाणां स्पर्धालवं सोढुमसर्षणास्ते।
पूजां जनन्या रिपुभिः समाप्य रेजू रणान्ते रुधिराक्तदेहाः ॥

(ப-உரை) ते हि = அவர்களோ எனில், शूराः = சூரர்களாகவும், प्रगल्भाः च = தைரியம் மிக்கவர்களாகவும், शात्रवाणां = எதிரி சமூகத்தினருடைய, स्पर्धालवं = சிறிது எதிர்ப்பைக் கூட, सोढुं = பொறுத்துக்கொள்ள, असर्षणाः = சகிப்புச் சக்தி இல்லாதவர்களாக, रिपुभिः = எதிரிகளால் जनन्याः = அன்னையினுடைய, पूजां = பூஜையை, समाप्य = செய்து முடித்து, रणान्ते = யுத்த முடிவில், रुधिराक्तदेहाः = ரத்தம் தோய்ந்த உடல்களுடன், रेजुः = பிரகாசித்தனர்.

(பொ-உரை) காளி மேலும் சொன்னது - பாரதப் பெருமக்கள் சூர வீரர்களாக, மிகுந்த மனோபலத்துடன் எதிரி சமூகத்தினரின் கடுகளவு எதிர்ப்பைக் கூட பொறுக்க மாட்டாதவர்களாக, எதிரிகளுடைய (பலியின்) மூலம் அன்னையின் பூஜையை செய்து முடித்து, போர் முடிவில் ரத்தம் தோய்ந்த சரீரங்களுடன் பிரகாசித்தனர்.

(வி-உரை) பாரதீயர்கள் ஞான மார்க்கத்தில் மிகவும் முன்னேறிவர்களாக இருந்ததால், வீரம் குறைந்தவர்களாய் இருந்தார்கள் என்று பொருளில்லை. பாண்டவர்கள் ஐவரேயானாலும், ஞானிகளாக இருப்பினும், நூறுபேராக இருந்த கௌரவர்களை மிகுந்த வீரத்துடன் யுத்தம் செய்து அழித்தனர். பாரதீயர்கள் பாரத மாதாவின் நற்செல்வங்களாகத் திகழ்ந்து மாதாவை மகிழ்வுறச் செய்வதில் கைதேர்ந்தவர்களாக இருந்தனர். மகாபாரத யுத்தம் ஆரம்பிப்பதற்கு முன், பாண்டவ ச்ரேஷ்டனை அர்ஜுனன் துர்க்காதேவியை வழிபட்டு வெற்றிக்காகப் பிரார்த்தித்தது இங்கு குறிப்பிடத்தக்கது.

(தொடரும்)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri. Hariharan Collection, Thiruvanmiyur, Chennai

அறிவுடைமை.

அறிவுஅற்றம் காக்கும் சுருவி செறுவார்க்கும்
உள்ளழிக்கல் ஆகா அரண். 1

प्रज्ञा प्राकृतिकी राज्ञां साधनं नाशवारणम्। (कम्।)
अरातिभिर्नाशयितुमशक्यं दुर्गमान्तरम् ॥ १

சென்ற இடத்தால் செலவிடா தீதுஒரீஇ
நன்றின்பால் உய்ப்பது அறிவு. 2

यथेच्छं सञ्चरच्चित्तं नियन्त्र्याऽऽवर्त्य दुष्टतः।
सद्धर्मविषयेष्वत्र प्रज्ञा वै सम्प्रवर्तिका ॥ २

எப்பொருள் யார்யார்வாய்க் கேட்பினும் அப்பொருள்
மெய்ப்பொருள் காண்பது அறிவு. 3

यत्किमप्यत्र वस्त्वस्तु तद्यः कोऽपि ब्रवीत्वपि।
तत्तदन्तस्स्थतत्त्वानां दर्शनं ह्येव सन्मतिः ॥ ३

எண்பொருள் ஆகச் செலச்சொல்லித் தான்பிறர்வாய்
நுண்பொருள் காண்பது அறிவு. 4

विषयान् दुर्ग्रहान् सम्यक् सुबोधान् संविधाय हि।
प्रोच्य स्वयं परास्येभ्यो मतिस्स्यात्सूक्ष्मदर्शिनी ॥ ४

உலகம் தழீஇயது ஒட்பம் மலர்தலும்
கூம்பலும் இல்லது அறிவு. 5

या विश्वं मित्रयत्यत्र सैव सन्मतिरिष्यते।
न सङ्कोचविकासौ सः लभते मित्रतां प्रति ॥ ५

எவ்வது உறைவது உலகம் உலகத்தோடு
அவ்வது உறைவது அறிவு. 6

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy.

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

समस्तस्यापि लोकस्यया वा सामयिकी गतिः ।
तामाश्लिष्यानुतिष्ठन्ती नृपाणां सन्मतिर्मता ।। ६

அறிவுடையார் ஆவது அறிவார் அறிவிலார்
அஃதுஅறி கல்லா தவர். 7

स्वयंप्राज्ञा भविष्यन्तं प्रागेवार्यं विदन्ति हि ।
तादृश्या प्रज्ञया हीना तज्ज्ञातुं नैव शक्नुयुः ।। ७

அஞ்சுவது அஞ்சாமை பேதைமை அஞ்சுவது
அஞ்சல் அறிவார் தொழில். 8

भयार्हेभ्यो हि वस्तुभ्यः निर्भीकत्वं विमूढता ।
भयं तदर्ह(भयार्ह) वस्तुभ्यो नूनं प्राज्ञाः प्रकुर्वते ।। ८

எதிரதாக் காக்கும் அறிவினுர்க்கு இல்லை
அதிர வருவதோர் நோய் 9

विद्यते सन्मतिर्येषां सम्यक्पूर्वविचारिणी ।
तेषां नृपाणां न भवेत् दुःखं किमपि भीषणम् ।। ९

அறிவுடையார் எல்லாம் உடையார் அறிவிலார்
என்னுடைய ரேனும் இலர். 10

समस्तसम्पत्सम्पन्नाः स्वयम्प्रज्ञाविलासिनः ।
तया विहीना दीनास्स्युः सर्वार्थभरिता अपि ।। १०

गिरिर्महान्, गिरेरब्धिर्महान्, अब्धेर्नभो महत्।
नभसोऽपि महद्ब्रह्म, ततोऽप्याशा महीयसी ।।

(உலகில்) மலை மிக உயர்ந்தது. மலையைவிட கடல் மிகப் பெரிது, அந்த கடலை விட ஆகாயம் பெரிது, அந்த ஆகாயத்தைவிட பரபிரம்மம் பெரிது, அந்த பிரம்மத்தைவிட (என்னே!) 'ஆசை' பெரிது!

—ஸுபாஷிதம்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection Digitized by Siddhanta eGangotri Gyaan

किरातार्जुनीये प्रथमः सर्गः

सप्तमः श्लोकः

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥

पदच्छेदः — विशङ्कमानः - भवतः, पराभवं, नृपासनस्थः, अपि, वनाधिवासिनः, दुरोदरच्छद्मजितां, समीहते, नयेन, जेतुं, जगतीं, सुयोधनः ॥ (१२ पदानि)

प्रतिपदार्थः — सुयोधनः - துர்யோதனன், नृपासनस्थः अपि - சிம்மாசனத்தில் இருப்பவனாயினும், वनाधिवासिनः - காட்டில் வாழ்கின்ற, भवतः - தங்களிடமிருந்து, पराभवं - தோல்வியை, विशङ्कमानः - (அச்சத்துடன்) எதிர்பார்கின்றவனாக, दुरोदरच्छद्मजितां - சூதாட்டம் எனும் கபட உபாயத்தினால் வெல்லப்பட்ட, जगतीं - பூமியை, नयेन - நீதியின் மூலம், जेतुं - தன் வசமாகச் செய்ய, समीहते - முயல்கின்றான்.

—★—

शब्दधातुरूपाणि

विशङ्कमानः - विशङ्कमानः, विशङ्कमानौ, विशङ्कमानाः - अकारान्त पुल्लिङ्गशब्दस्य प्रथमैकवचनम् ।

भवतः - भवतः भवद्भ्यां भवद्भ्यः - तकारान्त पुल्लिङ्गशब्दस्य पञ्चम्येकवचने रूपमिदम् ।

CC-0. Digitized by eGangotri Gyaan Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पराभव - पराभवम् पराभवौ पराभवान् - अकारान्त पुल्लिङ्गशब्दस्य द्वितीयैकववचने इदं रूपम्।

नृपासनस्थः - नृपासनस्थः नृपासनस्थौ नृपासनस्थाः - अकारान्त पुल्लिङ्गशब्दस्य प्रथमैकवचनम्।

अपि - अव्ययपदम्।

वनाधिवासिनः - वनाधिवासिनः वनाधिवासिभ्यां वनाधिवासिभ्यः नकारान्त पुल्लिङ्गाब्दस्य पञ्चम्येकवचनम्। भवतः इत्यस्य विशेषणम्।

दुरादरच्छद्मजितां - दुरोदरच्छद्मजितां, दुरोदरच्छद्मा-जिते, दुरोदरच्छद्मजिताः - आकारान्त स्त्रीलिङ्गशब्दस्य द्वितीयैकवचने रूपमिदम्।

समीहते - समीहते समीहेते समीहन्ते - सम् इति उपसर्गपूर्वक ईह चेष्टायाम् इति धातोः लटि प्रथमपुरुषैकवचनम्।

नयेन - नयेन नयाभ्यां नयैः - अकारान्त पुल्लिङ्ग शब्दस्य तृतीयैकवचनम्।

जेतुम् - तुमुन्नन्तमव्ययम्।

जगतीं - जगतीं जगत्यौ जगतीः ईकारान्त स्त्रीलिङ्गशब्दस्य द्वितीयैकवचनम्।

सुयोधनः - सुयोधनः सुयोधनौ सुयोधनाः - अकारान्त पुल्लिङ्गशब्दस्य प्रथमैकवचने रूपमिदम्।

व्याकरणविशेषाः — नृपस्य आसनं नृपासनं, तस्मिन्

CC-0.0 Public Domain. Digitization by Muthulakshmi Research Academy,

Digitized by Siddhanta eGangotri Gyaan & Hariharan Collection, Sholinganallur, Chennai

तिष्ठतीति मृगयासक्तः । वनमधिवसतीति तच्छीलः वनाधिवासी, तस्मात् वनाधिवासिनः । दुरोदरमेव छद्म दुरोदरच्छद्म, तेन जिता दुरोदरच्छद्मजिता, ताां दुरोदरच्छद्मजिताम् । जेतुं - जि जये इति धातोःतुमुन्नन्तमव्ययपदम् । विशङ्कमानः - वि इति उपसर्गपूर्वक 'शकि शङ्कायाम्' इति धातोः शानच् प्रत्ययः

सुखेन युध्यते इति सुयोधनः । दुरोरच्छद्मजिताम् इत्येतत् जगतीति स्त्रीलिङ्गशब्दस्य विशेषणं भवति । वनम् अधिवतीत्यत्र 'अधि शीङ्स्थासां कर्म' इति द्वितीयाविभक्तिः । अधिशेते वैकुण्ठं हरिः इति उदाहरणान्तरम् । एवम् अधितिष्ठति वैकुण्ठं हरिः, अध्यास्ते वैकुण्ठं हरिः इति ।

कोषः - दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्

अक्षो दुरोदरं प्रोक्तम्, (हलायुधः)

'भूतधात्री रत्नगर्भा जगती सागराम्बरा'

कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे - इत्यादमरः

भावार्थः — दुर्योधनस्तु सकलसाधनसम्पन्नः । तत्र भवान् काननवासी सेनादिहीनश्च विद्यते । अथापि आत्मनः पराजयः विपिनस्थात् त्वत्तः भवेदिति धार्तराष्ट्रः शङ्कते । शिष्टैः गर्हितेन द्यूतेन प्राप्तां धरित्रीं नीतिमार्गेण वशीकर्तुं सुयोधनः व्याप्रियते ॥

—पण्डितः रङ्गनाथशर्मा, सं.वि. समितिः, काञ्चीपुरम् ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गुरुभक्त उपमन्युः।

(महाभारतस्था उपमन्युकथा श्लोकैर्ग्रथिता)

डा. ग. शङ्करनारायणः व्याख्याता, SCSVMV एनात्तूर्, काञ्चीपुरम्-१

बभूव पूर्वं यमिनां वरेण्यः धौम्याभिधानः कलुषैर्विहीनः ।
स्वज्ञानपीयूषनिषेकमात्रात्प्रशाम्यदज्ञानदवाग्निपुञ्जः ॥ १

शिष्यास्त्रयस्तस्य विवेकवित्ताः तत्पादयपाथोजमधुव्रताभाः ।
वेदास्त्रयो मूर्तियुता इवासन् विद्याम्बुराशेः तटदर्शनोत्काः ॥ २

तेष्वग्रिमोऽभूदुपमन्युनामा गुर्वङ्घ्रिसेवापरिपूतचेताः ।
विद्याङ्गनालिङ्गनमात्रसौख्यो बभार तार्तीयकमक्षि शास्त्रम् ॥ ३

तं पुष्टगात्रं समुदीक्ष्य जातु पक्षे सिते चन्द्रकलेव शिष्यम् ।
पप्रच्छ हेतुं वपुषोऽभिवृद्धेः पुष्टोऽसि कस्माद्वद वत्स सत्यम् ॥ ४

सोऽवोचदाचार्यवेण्यमारा-
द्भावत्कदृष्ट्या परिपूतगात्रम् ।
वीक्ष्यैव मां ग्रामजनाः हि भक्त्या
स्वाद्वन्नयुक्तां वितरन्ति भिक्षाम् ॥ ५

वर्धे गुरो पुष्टिमयासिषञ्च शाखीव नद्याः जलसेचनेन ।
दोषो भवेत्तर्हि दयस्व दीने डिम्भस्य घातोऽपि मुदे गुरूणाम् ॥ ६

श्रुत्वेदमाचार्यवरो बभाषे ह्याचार्यपादाय निवेदनीया ।
भिक्षेति जानीहि वटो! विनीत ! मह्यं प्रदेह्याशु तवैव भिक्षाम् ॥७

इत्थं गुरोर्वाक्यमुदारवृत्तः
गृह्णन् तदाज्ञामनुवर्तमानः ।

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भिक्षां स्वकीयां विनिवेद्य भक्त्या
स्वाचार्यभक्तेरिव मूर्तिराभात् ॥ ८

भूयोऽपि तं पुष्टतनुं विलोक्य विद्यामिवाभ्यासबलेन पुष्टाम् ।
अपृच्छदाचार्यवरो हि हेतुं तं पुत्रकल्पं दयितः पितेव ॥ ९

शिष्यस्तदानीं विनयादवादीत्सिन्धोः स्ववेलेव गुरो! तवाज्ञा ।
नोल्लङ्घनीयेति दृढामतिर्मे भिक्षां समर्प्य प्रथमां त्वदङ्घ्रौ ॥ १०

भूयो द्वितीयामहमाददामि क्षमस्व दोषं यदि विद्यतेऽत्र ।
एवं समाकर्ण्य वचस्तदीयं गुरुर्बभाषे मधुरं कृपालुः ॥ ११

मैवं कृथाः वत्स! विगर्हितेयं द्वितयभिक्षा स्मृतिमार्गविद्भिः ।
पुनस्तदाज्ञां शिरसाभिगृह्णन् सम्पालयामास सदा प्रयत्नात् ॥ १२

तं पुष्टगात्रं पुनरप्युदीक्ष्य भूयोऽप्यपृच्छत्तनुवृद्धिहेतुम् ।
अभाणि शिष्येण विनीतवाक्यं स्निग्धं तनोः वर्धनहेतुगर्भम् ॥ १३

समर्प्य भिक्षां भवदङ्घ्रिपद्मे पिबामि दुग्धं ह्युदरस्य पूर्त्यै ।
बुभुक्षया पीडितमानवस्य प्रज्ञा न कार्यं कुरुते स्वधर्मे ॥ १४

निशम्य वाचं निजशिष्यगीतां गुरूत्तमेनाशु वचो ह्यवादि ।
वत्सैकपेयं खलु पुत्र! दुग्धं तस्मात्त्यजेः दुग्धमितः परं वा ॥ १५

आज्ञामिमां देशिकपुङ्गवस्य जग्राह मूर्ध्ना नृपतेः प्रजेव ।
भूयोऽपि वृद्धिं सहसा प्रपेदे वत्सास्यजाद्बुद्बुदलेहनात् सः ॥ १६

पृष्टः गुरूणां धुरि कीर्तितेन स्वकायवृद्धेः निजहेतुमारात् ।
प्रोवाच गोवत्सचयास्यगीर्णं फेनं तदाचार्यवरो बभाषे ॥ १७

मैवं कृथाः पुत्रक वत्सवृन्दाः ते स्नेहबन्धादधिकं गिरेयुः ।

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अतो जहीहीदमितः परञ्च ह्येवं निजादेशमवोचदार्यम् ।। १८

गुर्वाज्ञयैवं ग्रथितस्तपस्वी तत्याज भिक्षां विजहौ च दुग्धम् ।
तथैव फेनं व्यजहाद्विनीतः नैवोज्जहौ किन्तु यशोनिकुञ्जम् ।। १९

बुभुक्षयार्तः स वटुस्तदानीं विषार्कपत्राण्यभुनग्वनेषु ।
तेनान्धतां प्राप विषप्रभावात् नाबोधि मार्गं तरसा विमुग्धः ।।२०

गच्छन् स मार्गे निपपात कूपे संसारवार्धाविव मोहयुक्तः ।
नोद्धारणे साह्यमवाप तस्मादगाधकूपे चकितो ववर्ते । २१

तं शिष्यचूडायितमादरेण ह्यन्वेष्टुकामो गुरुराट्प्रतस्थे ।
अगाधकूपे पतितं स्वशिष्यं संवीक्ष्य चिन्ताकुलितो बभूव ।। २२

वत्सोपमन्यो! वदतां वरेण्य कस्माच्च हेतोः पतितोऽसि कूपे ।
आचक्ष्व सूनो! दयितोऽसि भक्त्या नाहं सहे ते श्रमलेशवार्ताम् ।। २३

उक्तस्तदानीं गुरुपुङ्गवेन वृत्तं स्वकीयं निजदृष्टिभङ्गम् ।
निवेदयामास निजार्तिमारादाचार्यपादाय वटुर्विनीतः ।। २४

निशम्य वृत्तान्तममुं स धीरः तस्मै मनुं दिव्यफलं ददेश ।
उवाचैवेममश्वाख्यसुरौ हि भक्त्या प्रसाद्य तावाशु लभस्व दृष्टिम् ।१५

इत्थं गुरोर्दिव्यनिदेशलाभाज्जजाप मन्त्रं सुरयुग्मतुष्टयै ।
तदा प्रसन्नौ तुरगाख्यदेवौ प्रायच्छतां दिव्यफलं ह्यपूपम् ।। १६

अपूपमासाद्य वटुस्तदानीं लब्धं गुरो खाद्यममुं कृपालो ।
त्वत्पादपद्मे विनिवेदयामि शाधीह कार्यं दययेत्यभाणीत् ।। २७

श्रुत्वेदमाचार्यवरो दयाब्धिरुत्फुल्लनेत्रो घृणया बभाषे ।
अद्यास्मि तोषाम्बुधिपारदर्शी भक्त्योपमन्यो तव पूतयाऽहम् ।।२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सर्वाणि शास्त्राणि तथा च वेदाः
सर्वे विनाऽधीतिमवाप्नुयास्त्वम् ।
अयं वरो मे सुत! जीव दीर्घं
त्वां कीर्तिलक्ष्मीः वृणुयात्प्रियेव ॥ २९

गुरोः प्रसादात् समवाप्तविद्यः दृष्टिं निजां दिव्यफलैरवाप्नोत् ।
वित्तं विनष्टं च पुनर्महार्घैः रत्नैरिवाप्तः बहुमोदमाप ॥ ३०

आचार्यभक्तेर्निकषाययमाणा कथेयमुक्ताऽऽदिमपर्वमध्ये ।
श्रीमन्महाभारतदिव्यवृत्ते तनोतु सेयं गुरुभक्तिमग्र्याम् ॥ ३१

प्रणमामि तं बृहदीश्वरम् !

—डा. अभिराजराजेन्द्र मिश्रः शिमला ।

प्रणमामि तं बृहदीश्वरम् । तञ्जापुरीशमीश्वरम् । चोलावनीश्वरमीश्वरम् ।

काञ्चीपुरे पृथिवीमयं श्रीजम्बुकेशे जलमयम् ।
अरुणाचले च ज्योती रूपं खमयं नमामि चिदम्बरम् ॥

मरुन्मयं कालहस्तिनि किल पञ्चतत्व समन्वितम् ।
गिरिजाधत्तं वृतमाधवं प्रणमामि तं जगदीश्वरम् ॥

व्योमलग्न गोपुरत्रयवेष्टितं बहुभूमिकम् ।
सिन्धुराननकार्तिकेपसमन्वितं गिरिजेश्वरम् ॥

पृथुलनन्दीश्वरसभाजितवैभवं पृथुमण्डपम् ।
सम्मुखप्रियागृहं रुचिराङ्गणं रुचिराजिरम् ॥

चरणधूलिपवित्रिताश्रित - राजराजमहीश्वरम् ।
स्थपतिरचनाचातुरीनिलयं नमामि महेश्वरम् ॥

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharam Collection, Sholinganallur, Chennai

विनिपातः ।

—श्रीसुन्दरराजः, I.A.S, (Retd.) भुवनेश्वरम् ।

निर्वाचने चयनमात्मनः ईहमानैः
स्वं जातिधर्ममतमाश्रयमादधद्भिः ।
हा जातिधर्ममतभेदविवादगर्ते
देशस्स्वनेतृभिरहो विनिपातमेति ।। १

लोकप्रियस्य निधनाय विपक्षनेतुः
हन्तारमेकमुपगम्य नियोजयद्भिः।
संत्रासवादिनमतः परिपोषयद्भिः
देशस्स्वनेतृभिरहो विनिपातमेति ।। २

नारीकुलं बलविहीनमतीव पिष्टं
पुंभिस्तदुन्नतिकृते प्रयतेमहीति ।
उच्चैर्वदद्भिरबलाः अवमानयद्भिः
देशस्स्वनेतृभिरहो विनिपातमेति ।। ३

निर्वाचने नियतमेकतृतीयमंशं
नारीकुलाय परिरक्षितुमस्मदिच्छा ।
एवं वदद्भिरथ तत्र तथा दधद्भिः
देशस्स्वनेतृभिरहो विनिपातमेति ।। ४

निर्वाचनार्थमपराधकृतो न योग्याः
एवं वदद्भिरपराधकृतस्स्वपक्षे ।
निर्वाचने प्रतिनिधीन् विदधद्भिरेतैः
देशस्स्वनेतृभिररहो विनिपातमेति ।। ५

CC-0. Public Domain. Digitization by Muthulakshmi Research Academy,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Collection, Sholinganallur, Chennai

एकं मतं परमतानिहं खलकृत्तमैः
प्रोत्साहयद्भिरितरद् बहु गर्हयद्भिः ।
उद्वेगमेवमधिकं जनयद्भिरुक्त्वा
देशस्स्वनेतृभिरहो विनिपातमेति ।। ६

उत्कोचपापमपयापयितुं प्रतिज्ञां
कृत्वा तथा प्रवचनं परितश्च दत्त्वा ।
उत्कोचसंग्रहमथ स्वयमादधद्भिः
देशस्स्वनेतृभिरहो विनिपातमेति ।। ७

दक्षं प्रशासनपदे धुतपक्षपातं
योक्ष्यामहे ऋजुमिति स्वयमेवमुक्त्वा ।
आत्मीयमेकमनृजुं हि नियोजयद्भिः
देशस्स्वनेतृभिरहो विननिपातमेति ।। ८

अन्यन्मनस्यथ निधाय वचस्यथान्यत्
अन्यच्च कर्मणि निजे विपरीतकृद्भिः ।
मञ्जादतीव मधुरं वचनं वदद्भिः
देस्स्वनेतृभिरहो विनिपातमेति ।। १०

रामादिभिश्चरितधर्मपथैर्नरेन्द्रैः
सत्ये रतैः हितपरैस्सततं प्रजानाम् ।
प्राक् शासितोऽद्य पुनरात्मपरैरलीकैः
देशस्स्वनेतृभिरहो विनिपातमेति ।। १०

नेता न चेत्तु शिवसुन्दरसत्यकामः सत्यं शिवं जगति सुन्दरमस्मदीयम् ।
राष्ट्रं कथं बलवदुन्नतमुत्तमं स्यात् एवं रुदन् वदति सुन्दरराजनामा ।। ११

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri.V Hariharan Collection, Sholinganallur, Chennai

अन्तर्जलस्य संरक्षणम्।

—K.A. *शास्त्री, पाडुबिद्री, कर्णाटकम्।*

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः॥

जलं जीवमूलम्। भगवता सुष्टेषु पञ्चसु भूतेषु अन्यतमम्। पृथिव्यां जलमस्तीत्येव जीवराशयः सन्ति। प्रथमा जीवसृष्टिः जलं एवेति जीवविज्ञानिनः अभिप्रयन्ति। संस्कृते नामान्तरमपि जलस्य 'जीवनम्'। जीवनस्य अनिवार्यः अंशः इत्यस्य सूचकम्। आहारं विना कतिचिद् दिनानि जीवितुं शक्नोति मानवः, किन्तु जलं विना न शक्नोति। सनातनसंस्कृतौ अस्य मातृस्थानम्। सर्वाः नागरिकताः नदीतटेनैव प्रक्रान्ताः। आध्यात्मिक साधनायां बहिरन्तश्शुद्धये पापनाशाय च तीर्थस्नानं प्रशस्तम्। नित्यं सन्ध्यावन्दने देवाराधने 'गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।' इति अस्माकं कूपस्य जले तासां पुण्यनदीनां सान्निध्यं प्रार्थयामः अस्माकं आर्षपरम्परायां भगवन् सर्वव्यापी, निर्गुणः, सगुणः, निराकारः साकारः च। तेन सृष्टुं जलमपि तथा। मानवशरीरस्यापि बह्वंशः जलमेव। जगतश्च बहुभागः जलमेव। शुद्धजलस्य कोऽपि वर्णोषु वा रुचिर्वा नास्ति। जलस्य स्वीयं रूपं आकृतिर्वा न विद्यते। कस्याऽपि वस्तुनः रूपं आकारं वा धारयितुमर्हति। किं च तद् द्रव-घन-अनिल रूपं च धारयितुं प्रभवति। एवं च

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Bharati Historical Collection, Bhoomigalluru Ramanna

अस्माकं जीवनमेव भगवान्। किं नु तस्य (हृदि) संरक्षरणं केवलं अस्माकं अवधानं अत्यल्पम्।

जलधिः जलस्य आकरः । भूमिः केवलं तस्य सङ्ग्रहणपात्रम् । सूर्य-लघु-बृहन्महीमृत्काननसम्पदां कृपया मेघाः उत्पद्यन्ते - तेषु जलधेः लवणजलं मधुरं सम्पद्यते । मेघाः वर्षासु भूमौ वर्षन्ति । विज्ञानं कियद्धा प्रगतिं प्राप्नोतु - कृतकवृष्टिः न यशस्विनी बहुमूल्या च । विज्ञानिनः प्रयोगशालायां जलकणं विभज्य कणद्वयं जलजनकस्य, एकं कणं आम्लजनकस्येति केवलं विवरीतुं प्रभवन्ति न निर्मातुम्।

पृथिव्यां लभ्ये जले ९७.२ लवणजलमेव । मधुरजलं केवलं २.८. तत्रापि ध्रुवप्रदेशे प्रायः नीहारखण्डरूपेणैव भवति । अतः एतत् मधुरजलं अस्माकं उपयोक्तुं लभ्यप्रमाणं न गण्यम् । प्रतिवर्षं प्रकृतिः केवलं ०.०९ वृष्टिरूपेण वितरति। एतस्य अमूल्यनिधेः दुरुपयोगः, अलक्ष्यमेव अद्यतनजलक्षामस्य निदानम्। भगवति उदारं वितरति सति दुर्लक्ष्यं प्रदर्श्य जलक्षामे प्रवृत्ते, कोमलनारिकेलजलेन अभिषिक्ते तस्मिन् सः सुप्रसीदेत् किम्? प्रकृतिनियमान् अतिक्रम्य जलं प्रति अलक्ष्यं वहामः चेत् आयतौ क्षामं आमन्त्रितवन्तः स्याम । अस्माकं पूर्वजाः वृक्षाणां पालने, नागवनानां, देवालय - ग्राम तटाकानां पारम्परिकबन्धानां च निर्माणे अतीव प्राज्ञाः आसन्। अन्तः मधुरजलस्तरं, विविधधार्मिकविश्वसानां वज्रलेपेन श्रद्धया च पालयन्ति स्म।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आधुनिकतायाः पूरेण अद्य सर्वं 'काङ्क्रीट्' मयं अस्ति । अव्यवस्थिताः कूपाः, गृह-सङ्कीर्णभवननिर्माणार्थं लुप्यन्ते । तटाकाः, काननानि, कृषिभूमिः विस्मर्यमाण-पारम्परिकबन्धाः लुप्यन्ते । तथा च हस्तोद्योगाः, नगरीकरणं - एतत्सर्वमपि जलं अवलम्बते । जलार्थं राज्यं राज्येन कलहायते । शुद्धजलस्य अभावः विविधरोगाणां कारणं भवति ।

भगवतः कृपया जलधितीरप्रदेशाः अद्यापि पर्याप्तां वृष्टिं प्राप्नुवन्ति । आधुनिकतायाः रभसेन जलस्य निसर्गसहज- विलयनप्रकाराः क्षीयन्ते । दशकेभ्यः पूर्वं 'लारी' यानद्वारा जलविक्रयः मार्च्मासानन्तरं दृश्यते स्म । इदानीं तु सप्तम्बर- मासे एव दृश्यते । वर्धमाननगराणि, बृहदुद्यमाः, समीपस्थनदीनां जलं यथेच्छं उपयुञ्जते । वर्षाजलं समुद्रतीरे वृष्टं जलं २४ घण्टातः २६ घण्टासु पुनः समुद्रं सङ्गच्छते । परशुरामसृष्टेः तु कुभूमौ क्षामः न भविष्यतीति प्राज्ञानां वचनं अयथार्थं वदति वा इति । संशयः उत्पद्यते । जलविषये इतःपरमपि यदि वयं न जागरुका भवेम तर्हि ध्रुवं अपायः भविष्यत्येव ।

अस्मात् अपायात् अस्मान् उत्तरयितुं उपायः अस्त्येव । उपायश्च सुलभ एव । भूमौ जलविलयनाय अरण्यसंवर्धनं, साम्प्रदायिकरीत्या नागवनानां, तटाकसरोवरादीनां निर्माणं, कूपानां सदुपयोगः,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai.

रन्ध्रकूपानां (Borewell) अङ्कुशः, साम्प्रदायिकबन्धानां पुनरुत्थापनं - इत्यादीनां प्राधान्यं देयमेव । एतैः सह अस्माकं गृहाङ्गणपरिसरेषु वृष्टं जलं भूमौ अन्तः पुनः पूरणाय उपयुक्तानि कतिचित् सुलभविधानानि अवश्यं सम्यक् विज्ञाय तानि कार्यगतानि कर्तव्यानि ।

नगरे विद्यमानेषु गृहेषु जलसङ्ग्राहकबृहत्कूपिकासु (Sump) 'तारसी' भवनस्य उपरितनचत्वरस्य जलं, प्रथम-द्वितीय-तृतीयवृष्टेः जलं च बहिः प्रवोढुं मुच्यते चेत् उपरितनाजिरं शुद्धं भवति । ततः तत्र पतितं जलं जलद्वारा शुद्धीभवनकूपिकायां गमयित्वा ततः रक्षितकूपिकायां सङ्ग्राह्यम् । निर्वातातपं रक्षितं जलं वर्षाणि शुद्धमेव भवति । एवं जलं निर्दुष्टं अवशिष्यत इति प्रयोगालासु परीक्षितम् । यनः संशेते चेत् पाकशालोपयोगं विना इतरकार्याय एतज्जलं अवश्यं उपयोक्तुं शक्यते । पर्यायविधानं नाम वृष्टेः जलं भूमिस्थे अन्तर्जले पुनःपूरणकार्यम् । भूमौ पतितस्य वर्षाजलं यावत्साध्यं तत्र तत्रैव विलायनं अस्य उद्देशः । तत्तत् प्रदेशस्य उपरितनभूमिः ,अवरोहणक्रमः, मुदः गुणः जलस्य पतनमार्गः - इत्यादिविषयान् सम्यक् परिशील्य विलायनकूपिका रचयितव्या । कूपिकायाः दीर्घता - आयततागाधतामानं नावश्यकम् । अनुकूलस्थलावकाशं चिन्तयित्वा विलायनकूपिका निर्मतव्या । अज - मेष - वृषभादीनां चारणस्थले अगाधकूपिका नोचिता ।

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy.

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आवश्यकी चेत् अयोवृतिः अयोजालिका वा रचनीया । अनुकूलता अस्ति चेत् बृहत्या दीर्घायतागाधकूपिकायाः क्षुद्रा - क्षुद्रा कूपिका वरम् । अनावश्यकमृदा पूर्णा चेत् वृष्टेः पूर्वं तस्याः उद्धरणं करणीयम् । कूपिका स्वच्छा करणीया । अधस्तनप्रदेशेषु अन्तर्जलं वर्धयितुं उपरितनप्रदेशेष्वेव जलविलायनकूपिकाः निर्मातव्याः । वृष्टं जलं सरलेन मार्गेण पुनः पूरणं कर्तुं शक्यते । किन्तु जलं औन्नत्येन न पतेत् - कूपस्य पार्श्वभूमिं वा न स्पृशेत् । आवश्यकं शुद्धीकरणपात्रं उपयुञ्जीत । विलायनकूपिकाः रन्ध्रकूपिकानां पुनः पूरणायाऽपि उपयुञ्जते । वल्मीकाः तु अन्तर्जलस्य पुनः पूरणाय अतीव प्रशस्ताः । वल्मीकान् उपयुज्य वर्षाजलं पुनः पूर्वेत चेत् भूगर्भः अत्यधिकं विलीयेत । कनिष्टं यदि अङ्गणे उद्याने च वर्षाजलं नालिकेरवृक्षाणां तलेषु यथा प्रवहेत् तथा कुर्मश्चेदपि ततः तत् बहिर्गच्छेदपि अन्तर्जलस्य पुनः पूरणाय अस्माकं 'पृष्ठत्रिरेख' सेवा सिद्धचेत् ।

अन्तर्जलवृद्धचर्थं भूमौ यद्वर्षाजलं विलापयामः तज्जलं अस्माकमेव कूपं अवतरति वा? इति केचन पृच्छन्ति । जलं विलाप्य ये यशस्विनः तेषामेव अनुभवेन उत्तरं प्राप्तव्यम् । परं तु अस्माकं कूपे कुतः जलं आयाति? के कदा जलविलापनं कृतवन्तः? निश्चितं किमपि वक्तुं न शक्नुमः । विलयनं प्राप्तस्य जलस्य निश्चितं मार्गं अवगन्तुं न शक्नुमः । अतः पूर्वजाः कूपे जलप्राप्तिः भगवतः दयया इति कथयन्ति । कर्मण्येवाधिकारस्ते मा फलेषु कदाचन इति

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

Digitized by Arya Samaj Foundation Chennai and eGangotri
भगवदुक्तिरपि तादृश्येव वर्तते । भगवता दत्तेन वर्षाजलेन भूमातुः उदरं पूरयामः चेत् भगवान् न प्रसीदेत् किम्? परिसरे सर्वेऽपि एकीभूय जलसंरक्षणं कुर्याम चेत् सर्वत्र परिसरे अन्तर्जलस्तरः समृद्धश्चेत् जलविषये निश्चिन्ताः भवेम ।

किञ्च केचन 'अस्माकं कूपोऽपि नास्ति, रन्ध्रकूपोऽपि नास्ति वयं किमर्थं भूमौ जलविलायनं कुर्याम इति आदौसीन्यं वहन्ति । प्रायः बहवः जनाः जलस्य मूल्यवितरणं केवलं कर्तव्यं मन्वते किन्तु ते स्मरन्तु - सर्वेषां मधुरजलप्राप्तिः केनचित् वर्षाजलेनैव

जीवने कस्यचिदुपकारेणैव जीवद्भिरस्माभिरपि, इतरेां परोपकारं कृत्वा तेन ऋणेन मोक्तव्यं आवश्यकं ननु? जलं उपयुञ्जमहे चेत् जलसंरक्षणं अनिवार्यम् । जागतिक-तापमानस्य वृद्ध्या अनेके प्राकृतिकविकोपाः दृश्यन्ते । एवं तापमानेन वृद्धः समुद्रस्तरः यदा परिवृद्धः भवेत् तदा समुद्रतीरप्रदेशे मधुरजलस्तरः अवश्यं अपायं प्राप्स्यतीति विज्ञानिनः अभिप्रयन्ति । प्रकृत्याराधकसंस्कृत्या परिपुष्टाः वयं प्रकृतिमाता यथा आयतौ क्रुद्धतरा न भवेत्, ततः पूर्वमेव जागरूकाः भूत्वा कार्योन्मुखा भवेम । जलविषये निश्चिन्ताः भवेम ।

CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit SK V Hariharan Collection, Digitized by eGangotri

लोकस्य आधुनिकी स्थितिः।

एस्. हरिहरन् सं.वि.स. नञ्जनगूर्

'लोकस्य आधुनिकी स्थितिः' इत्यस्मिन् विषये 'आहारशुद्धौ सत्त्वशुद्धिः' इति दृष्ट्वा स्थितिं विमृश्य पश्यामः।

लोकस्य जनसङ्ख्या सप्तशतकोटिः (700 corres0। अत्र क्रिस्तीयाः विंत्यधिक शतद्वयकोटिः (220 crores)। महाम्मदीयाः सार्धैकशतकोटिः (150 crores)। वैदिकमतजनाः अर्थात् हिन्दवः एकशतकोटिः (100 crores)। नेस्तिकानां, मतविषये उदासीनानानमपि अनल्पसङ्ख्या वर्तते। अत्र मांसाहारिणः, शाकाहारिणः चेति विभज्य पश्यामः चेत् हिन्दुषु एव शाकाहारिणः, अधिकतया वर्तन्ते। लोकजनसङ्ख्यायां शाकाहारिणः निकृष्टतया पञ्चोत्तरशतं (५) वा उत्कृटतया दशोत्तरातं (१०) भवन्ति।

कस्मिन्नपि काले अतीते, तदात्वे वा आयत्यां लोकस्य स्थितिः का भवितव्या इति प्रश्नः पृष्टः चेत् उत्तरं 'लोकः क्षेममेव भुञ्जीत' इत्येव भवति नात्रसंशयः। परन्तु आधुनिक्यां स्थितौ 'लोकः क्षेमं भुङ्क्ते वा' इति प्रश्नः पृष्टः चेत् 'आम्' इति वक्तुं केनापि न शक्यते सतः सर्वत्र विस्फोटाः सर्वत्र अक्रमेण भूम्याक्रमणं, कलहः, रणः, द्रोहः, हठात् स्त्रीसम्भोगः (Rape) इत्यादि सर्वं प्रचलति।

लोकः क्षेमं न भुङ्क्ते इति चेत् अत्र मूलकारणम्, आहारविषये अशुद्धिः एव। आहारशुद्धौ सत्त्वशुद्धिः। सत्त्वशुद्धौ अहिंसा, दया, जीवकारुण्यमित्यादयः भवन्ति। आहारशुद्धिः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

शाकाहारिणामेव भवति । मांसाहारिणाम् तु आहारशुद्धिः नूनं न भवति । मांसखादनमधिकृत्य महाभारतस्य अनुशासनपर्वणि भीष्मेण युधिष्ठिराय यदुपदिष्टं तत् पश्यामः । अत्त एतत् स्मर्तव्यं यत् साक्षात् भगवान् श्रीरामः, पञ्चपाण्डवाः, स्वयं भीष्मः इत्येते सर्वे मांसाहारिणः एव इति । एते अवतारपुरुषाः । एतें विषयः व्यवहारः वा भिन्नः परं । तु अस्मत्सदृशानां सामान्यजनानां विषयः व्यवहारः वा भिन्नः इति अवलोकनं कर्तव्यम् ।

CC-0. Vaidika Vidwan Pandit Sri V.Hariharan Collection, Sholinganallur, Chennai.

भीष्मः युधिष्ठिरं अति एवमुपदिशति यत् मांसवर्जने बहवो गुणाः इति ।

'स्वमांसं परमांसेन यो वर्धयितुमिच्छति ।
नास्ति क्षुद्रतरस्तस्मात् स नृशंसतरो नरः ।।'

इति उक्त्वा भीष्मः मांसाहारिणं क्षुद्रतरमिति नृशंसतर इति च निन्दति । 'मांस भक्षणे तु महान् दोषः निवृत्त्या पुण्यमुच्यते' इति उक्त्वा सर्वेषु भूतेषु दया इहलोके, परत्र च पुण्यमिति प्रशंसति । दयावतः नरस्य भयं न विद्यते इत्युक्त्वा दयावतामिमे लोकाः सुखदाः भवन्ति इति उपदिशति । अहिंसालक्षणः धर्मः इति धर्मविदः वदन्ति इत्युक्त्वा 'यः सर्वमांसानि यावज्जीवं न भक्षयेत्, सः स्वर्गे विपुलं स्थानं प्राप्नुयात् इत्यत्र न संशयः' इति कथयति । 'ये जीवितुमिच्छया भूतानां मांसानि भक्षयन्ति ते अपि तैः भूतैः भक्ष्यन्ते' इति निर्दिश्य भीष्मः एवं वदति ।

'मां स भक्षयते यस्मात् भक्षयिष्ये तमपि - अहम् ।
एतत् मांसस्य मांसत्वम् अनुबुद्धचस्व भारत ।।'

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अर्थात् मांसमक्षी कालान्तरे मांसेन भक्षितः भविष्यति इति। मास भक्षिणः पुनर्जन्म विद्यते इति अर्थः अत्र विवक्षितः। 'अहिंसा परमो धर्मः। अहिंस्रः सर्वभूतानां माता इव पिता इव भवति' इति स्तौति भीष्मः। 'अहिंसा परो दमः परमं दानं, परमं तपः, परमः यज्ञः परं फलं, परमं मित्रं, परमं सुखम्' इति अहिंसास्तुतिपूर्वकमुपदिशति। मांसाहारे विद्यमाना अशुद्धिः। हिंसा च अस्मासु दुर्योधनसदृशान् जनयेत् इति भीत्या एवं मांसाहारं विरुद्ध्य भाषते भीष्मः।

लोकः अक्षेममेव भुङ्क्ते इति आधुनिकी स्थितिः। यदि लोकः क्षेमं भोक्तुमिच्छति तर्हि शाकाहारी भवतु, क्षेमं भुनक्तु इति उपदेशः। एतदुपदेशपालनं लोकः कुर्यादिति वयं प्रार्थयाम।

अमृतमथनकाले सौन्धवं कोऽपि जह्रे
परुषविषमहोऽन्यो लीलया स्वादते स्म।
करधृतवरमालां लब्धवान् कोऽपि लक्ष्मीं
शृणु नव-नव-रागी प्रायशः सर्वलोकः॥

பாற்கடலில் அம்ருதம் வேண்டி கடலைக் கடையும் நேரத்தில், ஒருவர் உச்சை ச்ரவஸ் என்ற குதிரையை (வேறெவரும் காணுதவாறு) தட்டிக் கொண்டார், வேறொருவர் கொடிய விஷத்தையுமல்லவா விளையாட்டாக வாயில் போட்டு விழுங்கினர்! இன்னுமொருவர், மணாளனே ஏற்க மாலையும் கையுமாயிருந்த லக்ஷ்மி தேவியை எளிதாய்ப் பெற்றாரே! கதையைக் கேளேன்! உலகம் முழுதுமே 'புதுப் புது' பொருளை (அது எதுவாயினும்) ஆர்வமாக ஏற்றுக் கொள்வது வழக்கம்!

பண்டித - ஈ.எஸ் ராமமூர்த்தி சாஸ்திரி, கும்பகோணம்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

—श्रीमती अनन्तलीमी नटराजन्, कल्यापुरी ।

श्रीव्यासप्रणीतपद्मपुराणान्तर्गत गीतायाः 'विश्वरूप-दर्शनयोगः' नामक-एकादशाध्यायमहिमा

'मेघङ्करम्' इति नगरं 'प्रणीता' नाम्न्याः नद्यास्तटे वर्तते । तुङ्गप्राकारगोपुरयुतं विशालाश्रमशालासु स्वर्णस्तम्भविभूषितं च एतन्नगरं श्रीमद्भिः, सुखिभिः, शान्तैः, सदाचारोर्जितेन्द्रियैः अधिष्ठितमासीत् । भगवान् विष्णुः, त्रिविक्रमवपुः, चक्रपाणिः एतन्नगरमध्यास्ते । एतन्मन्दिरं समया 'मेखला' नाम महातीर्थं विद्यते । अस्मिन् तीर्थे स्नात्वा भगवन्तं जगन्नाथं विष्णुं नित्यं सम्पूज्य नरैः वैष्णवं पदं प्राप्यते ।

एतस्मिन् मेघङ्करे विख्यातः कश्चित् ब्राह्मणसत्तमः 'सुनन्दः' नामासीत् । एषः वेदशास्त्रविशारदः, वशीकृतेन्द्रियग्रामः वासुदेवपरायणः च । एषः भगवतः विष्णोः सन्निधौ गीतायाः 'विश्वरूपदर्शनं' नाम एकादशाध्यायं प्रतिनित्यं पठति स्म । भगवता अनुगृहीतः एषः सुखेन जीवनं यापयति स्म । एषः एकादशाध्यायजपप्रभावेण ब्रह्मज्ञानमवाप । एकदा एषः महायोगी कैश्चित् यात्रिकैः सह सिंहराशिस्थिते गुरौ गोदावरीतीर्थयात्रां विधातुमुपचक्रमे मार्गमध्ये असौ पुण्यक्षेत्रेषु देवान्नमन् तत्र तत्र अष्टतीर्थेषु स्नात्वा पितृतर्पणं च चक्रे । एकस्मिन् आलये कुमारीशं शिवं नत्वा, अन्यत्र देवं मधुसूदनं सम्पूज्य, नरसिंहवने प्रह्लादपूजितं नृकेसरिणं पूजयित्वा च अम्बिकापुरं ययौ । तत्र ष्याणामखिलान्ययपि वाञ्छितानि

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पूरयन्तीमम्बिकां भक्त्या विविधैः स्तोत्रैः तुष्टाव । ततः विप्रः सुनन्दः यत्र परमाशक्तिः, महाद्युतिः, महालक्ष्मीः आस्ते तत्कण्ठस्थानाभिधं' पुरं प्राप । तस्मिन् पुरे भगवतीं महालक्ष्मीम् आराध्य एषः मुनीश्वरः सुनन्दः यात्रिकैः सह रात्रौ वस्तुं प्रतिगृहं वारसस्थानमयाचत । कस्मिन्नपि गेहे द्विजः स्थातुं वसतिं न लेभे । ततः ग्रामपालेन दर्शितं विशालं सार्वजनवासमन्दिरं प्राप्य ब्राह्मणः इतरैः यात्रिकैः सह प्रविश्य तत्र वसतिं चक्रे । ततः विमले प्रभाते असौ द्विजोत्तमः सुनन्दः वासगेहात् बहिः स्थितमात्मानं ददर्श । सहगतान् सर्वान् अन्यान् यात्रिकान् तिरोहितान् ज्ञात्वा वज्रताडितः इव प्रचकितः अभवत् । शोकातुरः एषः यदा अन्येषां यात्रिकाणां गतिं प्रति चिन्तयति तदा तत्रागतं ग्रामपालम् अपृच्छत् । स एतदपि अपृच्छत् 'कुतः अत्रत्या; पुरवासिनः अतिथिसत्कारशीलाः न सन्ति' इति । ग्रामपालः तु एनं सुनन्दं सजीवं दृष्ट्वा नितरां चकितः । कोऽपि लोकोत्तरप्रभावः तस्मिन् सुनन्दे वर्तते इति मत्वा स ग्रामपालः तस्मै नगरवृत्तान्तं कथयामास ।

ग्रामपालः उवाच — 'हे ब्राह्मणोत्तम ! अस्मिन्नगरे घोरः पुरुषादः एकः निशाचरः वर्तते । सः दृष्टिगोचरान् नरान् नित्यं खादति । सः एकदा नागरैः पुरुषैः प्रार्थितः - 'हे राक्षस ! एतस्मिन् सार्वजनवासमन्दिरे ये पान्थाः ग्रामपालप्रवेशिताः निशि निद्रान्ति तान् भुङ्क्ष्व' इति । सोऽपि राक्षसः तथेति अङ्गीचकार । नागराः आत्मीयप्राणगुप्तये तस्य राक्षसस्य आहारमेवं कल्पयामासुः । अतः एव नागराः अतिथिविषये सत्कारशीलाः न । भवान् अस्मिन् सार्वजनवासमन्दिरे इतरैः

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai.
सह सुप्तः। अनेन राक्षसेन अन्ये ग्रस्ताः। भवान् तु मुक्तः अस्ति। एतदाश्चर्यमेव' इति।

तस्य ग्रामपालस्य तनयः अपि तस्यां रात्रौ अजागरूकतया तस्मिन् वासमन्दिरे स्वमित्रेण सह सुप्तः, तेन राक्षसेन निशिभक्षितः सह सुप्तः, तेन राक्षसेन निशि भक्षितः च। दुःखितः ग्रामपालः तं राक्षसम् अपृच्छत्। राक्षसः उवाच — 'हे ग्रामपाल ! अन्तः प्रविष्टं तव पुत्रं पान्थं मत्वा अज्ञात्वा अहमभक्षयम्। तत्र एकं द्विजमहं भक्षयितुम् अशक्तः अभवं यतः स गीतायाः एकादशाध्यायाम् अनिशं पंठति। एकादशाध्यायस्य अद्भुतसामर्थ्येन मम मुक्तिः, मृतानां पुनरुद्भवः च भविष्यति। तथा दैवेन परमेष्ठिना विहितम्' इति। ग्रामपालः पुनः राक्षसमपृच्छत् - 'कथम् एकादशाध्यायस्य ईदृशः अद्भुतः प्रभावः' इति। राक्षसः उवाच - 'पुरा नभोमार्गेण गच्छता एकेन गृध्रेण अस्थिखण्डं स्वतुण्डाग्रात् एकस्मिन् जलाशये पातितम् तदा समीपस्थः कोऽपि योगी तं जलाशयमागत्य महातीर्थमिति ज्ञात्वा स्नानं, पितृतर्पणं च विदधे। एतत् दृष्ट्वा विस्मिताः सर्वे जनाः तं योगिनम् अपृच्छन् - 'एषः जलाशयः अपवित्र एव एतावत्कालपर्यन्तम्। परं कथमेतदद्य महातीर्थमभवत्' - इति।

योगी उवाच — 'एकः नियतेन्द्रियः विप्रः एकादशाध्यायं त्रिसन्ध्यं पठति स्म। असौ पथि चोरैः व्यापादितः। तस्य अस्थिशकलं गृध्रवदनात् जले पतितम्। तेन इदं तीर्थं दिव्यं पातकनाशनं च जातम्' इति। राक्षसः उवाच — 'ततः ते मानवाः सर्वे तत्र जलाशये सस्नुः। ते निष्कल्मषाः भूत्वा परमं पदं प्रापुः च। यः द्विजः मया भक्षयितुमशक्यत्वात् मुक्तः स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सुनन्दः यदि तीर्थम् एकादशाध्यायजपेन अभिमन्त्र्य ममोपरि क्षिपेत् तर्हि मम शापमुक्तिः भविष्यति । तथा मया हतानां यात्रिकाणामुपरि क्षिपति चेत् तेषामपि मुक्तिः भविष्यति' इति ।

सुनन्दः तस्य राक्षसस्य शापकारणं जिज्ञासुः तं ग्रामपालमपृच्छत् - 'हे ग्रामपाल ! असौ केन पापेन राक्षसः जातः' इति । ग्रामपालः उवाच— 'अस्मिन् ग्रामे पुरा कश्चित् विप्रः कृषिकार्यं करोति स्म । एषः ब्राह्मणकर्म त्यक्त्वा कृषिकर्म स्वीचकार । एकदा एषः केदाररक्षणे तत्परः आसीत् । तदा नातिदूरे एकः महागृध्रः पान्थमेकमभीषयत् । स पान्थः वेदनया पीडितः परित्राणाय चुक्रोश । असौ कृषीवलः व्यथितस्य पान्थस्य प्रार्थनां श्रुत्वापि न उपचकार । स गृध्रः पान्थं हत्वा भुक्त्वा च अम्बराध्वना निरगात् । एतत् वीक्ष्य एकः तापसः कोपात् तं कृषीवलं बभाषे 'हे दुर्बुद्धे ! अकरुणं भवन्तं धिक् । भवान् दुष्टगृध्रेण भक्ष्यमाणं पान्थं पश्यन्नपि, रक्षणसमर्थोऽपि रक्षणं नाकरोत् । एतद्धधफलं भवान् लभेत । यतः न्किपः भवान् तस्मात् कारणात् निशाचरः भविष्यति' इति । तापसस्य शापं श्रुत्वा वेपमानहृदयः कृषीवलभूतः विप्रः तापसं प्रणम्य शापमोक्षं प्रार्थयामास । स तापसः बभाषे - 'यः विप्रः, एकादशाध्यायं वेत्ति, अनुदिनं जपति च, तेन अभिमन्त्रितं जलं यदा भवतः शिरसि पतिष्यति तदा शापात् मुक्तिः भविष्यति' इति । एवमुक्त्वा तापसः गतः, कृषीवलभूतः विप्रः राक्षसोऽभवत् च ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Narmadan Collection, Sholinganallur, Chennai

एतत् निशम्य सकरुणः सुनन्दः आदरेण यत् कर्तव्यं तत् चकार । गीतायाः एकादशाध्यायस्य प्रभावेण राक्षसः शापात् मुक्तः । तेन राक्षसेन निगीर्णाः सहस्राधिकाः जनाः विमलीकृतदिव्यदेहाः सञ्जाताः । तेषु ग्रामपालः स्वतनयम् अभिज्ञातुं नाशक्नोत् । ग्रामपालः - 'मम तनयः कः' इति अपृच्छत् । राक्षसः स्निग्धं राजीवलोचनमेकं दर्शयित्वा 'एष एव भवतः तनयः' इत्युवाच । ग्रामपालः तस्य वचः श्रुत्वा तं तनयं दृष्ट्वा च स्वगृहमागन्तुमाह्वयत् । तदा स तनयः जहास, उवाच च - 'हे पूज्यपितः ! एतत् जगत् मिथ्या । अतः पिता, पुत्रः, भ्राता, इत्यदिशब्दैः सूचितं बन्धुत्वं महामोहजातमेव । वयं सर्वे परमात्मनः विस्फुलिङ्गाः । एतदेव सत्यम् । अध्यात्मज्ञानमार्गं त्यक्त्वा लौकिककूटच्छन्नमार्गे पतितुं नेच्छामि । अहं विबुधोऽस्मि । विप्रस्य सुनन्दस्य प्रसादतः वैष्णवं धाम यास्यामि । एतादृशावकाशः दुर्लभः । भवानपि अस्मात् विप्रात् एकादशाध्यायमधीताम् तदनु जपतु । भवतः उत्तमा गतिः भविष्यति न संशयः । सतां सङ्गः दुर्लभः । विश्वरूपाध्यायस्य पाठतः तद्विष्णोः पदप्राप्तिः भविष्यति । विश्वरूपस्मरणं भवभीतानाम् आधिव्याधिभयापहम्, अनेकजन्मदुःखघ्नं च' इति । एवमुक्त्वा तनयः विष्णोः परमं पदं प्राप । तस्मात् विप्रात् एकादशाध्यायम् उपदेशरूपेण अवाप । तावुभौ तस्याध्यायस्य महिम्ना वैष्णवं पदं जग्मतुः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V.Hariharan Collection, Sholinganallur, Chennai

'Hi- Energy' Silver Zinc
Nickel Cadmium Cells

UNIQUE FEATURES

High Energy Density * Capability of very High rate discharge * Long life * Economical * Extremely Rugged * Wide Range

For further details please contact / write to:

High Energy Batteries (India) Limited
(FORMERLY SIMCO METTERS LTD. BATTERY DIVISION)
MATHUR - 622 515
(PUDUKKOTTAI DISTRICT)
Regd. Office:
Eswin House, Perungudi, Chennai - 600 096

With best Compliments

SRI S.V. PARASURAMAN
(Proprietor)

RAM ENTERPRISES
Mylapore, Chennai - 4
Dealer :

Hindustan Petrolium Corporation Ltd.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Date of Publication : 10th of every month - September 2013
REGISTERED Registration No. TN / CC (S) DN / 443 / 12 - 14
TN / PMG (CCR) / WPP 696 / 12 - 14
Registration with Registrar News Paper of India 30478 / 77
SAMSKRITASRI

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

With best compliments from :

LITEROOF

(Poineers in Manufacture of Asphaltic Corrugated & Plain Roofing Sheets)

NEW TUF-10 SER

(Janatha - Deluxe - Expodel Expo - 10

LITEROOF

IS

(Economical * Flexible * Durable * Weather Proof

* Fire-Resistant

LITEROOF

FOR

*Factories - Theatres * Schools * Housing * Poultry *

Dairy Farms etc.,

LR

LIGHT ROOFINGS LIMITED

No. 35, 7th Street, V.S.I. Estate Phase II,
Thiruvanmiyur, Chennai - 600 041
Phone : 2454 4949 * 2454 4950

Printed by : Zigma Graphics, 9/1, Thirtharappan Street, Triplicane-5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the Samskrit Education Society (Regd.)
Old 212/13-1, New No 11, St. Mary's Road, R A. Puram, Chennai - 600 028.

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,